श्री गुरुचरणकमलेभ्यो नमः
ऋणहर्ता गणपति स्तोत्र

ॐ सिंदूर वर्ण द्विभुजं गणेशंलम्बोदरं पद्मदले निविष्टम् ।
ब्रह्मादिदेव्यैः परिसेव्यमानं सिद्धैर्युतंतं प्रणमामि देवम् ॥

सृष्ट्यादौ ब्रह्मणा सम्यक् पूजितः फलसिद्धये ।
सदैव, पार्वतीपुत्रः ऋणनाशं करोतु में ॥

त्रिपुरस्य वधात्पूर्व शंभुना सम्यगर्चितः ।
सदैव पार्वतीपुत्रः ऋणनाशं करोतु में ॥

हिरण्यकश्यप्वादीनां वधार्थे विष्णुनार्चितः ।
सदैव पार्वतीपुत्रः ऋणनाशं करोतु में ॥

महिषस्य वधे देव्या गणनाथः प्रपुजितः ।
सदैव पार्वतीपुत्रः ऋणनाशं करोतु में ॥

तारकस्य वधान्पुर्व कुमारेण प्रपुजितः ।
सदैव पार्वतीपुत्रः ऋणनाशं करोतु में ॥

भास्करेण गणेशो हि पूजितच्छ विसिद्धये ।
सदैव पार्वतीपुत्रः ऋणनाशं करोतु में ॥

शशिनां कान्तिवृद्धयर्थ पूजितो गणनायकः ।
सदैव पार्वतीपुत्रः ऋणनाशं करोतु में ॥

पालनाय च तपसो विश्वामित्रेण पूजितः ।
सदैव पार्वती पुत्रः ऋणनाशं करोतु में ॥

इंद ऋणहर स्तोत्र तीव्र दारिद्र्य नाशनम् ॥
एक वारं पठेन्नित्यं वर्षमेकं समाहितः ॥

दरिद्र्य दारुणं त्यक्त्वा कुबेर समतां व्रजेत् ॥

****